# Rishibhih Kritam 2 Shiva Stotram

# ઋષિભિઃ કૃતં ૨ શિવસ્તોત્રમ્

## Document Information

Text title : Rishibhih Kritam 2 Shiva Stotram

File name : RRiShibhiHkRRitaM2shivastotram.itx

Category : shiva, lingapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : lingapurANa | uttarabhAga | adhyAya 19/27-43||

Latest update : October 12, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 12, 2024

*sanskritdocuments.org*

# ઋષિભિઃ કૃતં ૨ શિવસ્તોત્રમ્

ઋષય ઊચુઃ ।
નમઃ શિવાય રુદ્રાય કદ્રુદ્રાય પ્રચેતસે ।
મીઢુષ્ટમાય સર્વાય શિપિવિષ્ટાય રંહસે ॥ ૨૭॥

પ્રભૂતે વિમલે સારે હ્યાધારે પરમે સુખે ।
નવશક્ત્યાऽऽવૃતં દેવં પદ્મસ્થં ભાસ્કરં પ્રભુમ્ ॥ ૨૮॥

આદિત્યં ભાસ્કરં ભાનું રવિં દેવં દિવાકરમ્ ।
ઉમાં પ્રભાં તથા પ્રજ્ઞાં સન્ધ્યાં સાવિત્રિકામપિ ॥ ૨૯॥

વિસ્તારામુત્તરાં દેવીં બોધનીં પ્રણમામ્યહમ્ ।
આપ્યાયનીં ચ વરદાં બ્રહ્માણં કેશવં હરમ્ ॥ ૩૦॥

સોમાદિવૃન્દં ચ યથાક્રમેણ સમ્પૂજ્ય મન્ત્રૈર્વિહિતક્રમેણ ।
સ્મરામિ દેવં રવિમણ્ડલસ્થં સદાશિવં શઙ્કરમાદિદેવમ્ ॥ ૩૧॥

ઇન્દ્રાદિદેવાંશ્ચ તથેશ્વરાંશ્ચ નારાયણં પદ્મજમાદિદેવમ્ ।
પ્રાગાદ્યધોર્ધ્વં ચ યથાક્રમેણ વજ્રાદિપદ્મં ચ તથા સ્મરામિ ॥ ૩૨॥

સિન્દૂરવર્ણાય સમણ્ડલાય સુવર્ણવજ્રાભરણાય તુભ્યમ્ ।
પદ્માભનેત્રાય સપઙ્કજાય બ્રહ્મેન્દ્રનારાયણકારણાય ॥ ૩૩॥

રથં ચ સપ્તાશ્વમનૂરુવીરં ગણં તથા સપ્તવિધં ક્રમેણ ।
ઋતુપ્રવાહેણ ચ વાલખિલ્યાન્સ્મરામિ મન્દેહગણક્ષયં ચ ॥ ૩૪॥

હુત્વા તિલાદ્યૈર્વિવિધૈસ્તથાગ્નૌ પુનઃ સમાપ્યૈવ તથૈવ સર્વમ્ ।
ઉદ્વાસ્ય હૃત્પઙ્કજમધ્યસંસ્થં સ્મરામિ બિમ્બં તવ દેવદેવ ॥ ૩૫॥

સ્મરામિ બિમ્બાનિ યથાક્રમેણ રક્તાનિ પદ્મામલલોચનાનિ ।
પદ્મં ચ સવ્યે વરદં ચ વામે કરે તથા ભૂષિતભૂષણાનિ ॥ ૩૬॥

દંષ્ટ્રાકરાલં તવ દિવ્યવક્ત્રં વિદ્યુત્પ્રભં દૈત્યભયઙ્કરં ચ ।

સ્મરામિ રક્ષાભિરતં દ્વિજાનાં મન્દેહરક્ષોગણભર્ત્સનં ચ ॥ ૩૭॥

સોમં સિતં ભૂમિજમગ્નિવર્ણં ચામીકરાભં બુધમિન્દુસૂનુમ્ ।
બૃહસ્પતિં કાઞ્ચનસન્નિકાશં શુક્રં સિતં કૃષ્ણતરં ચ મન્દમ્ ॥ ૩૮॥

સ્મરામિ સવ્યમભયં વામમૂરુગતં વરમ્ ।
સર્વેષાં મન્દપર્યન્તં મહાદેવં ચ ભાસ્કરમ્ ॥ ૩૯॥

પૂર્ણેન્દુવર્ણેન ચ પુષ્પગન્ધપ્રસ્થેન તોયને શુભેન પૂર્ણમ્ ।
પાત્રં દૃઢં તામ્રમયં પ્રકલ્પ્ય દાસ્યે તવાર્ઘ્યં ભગવન્પ્રસીદ ॥ ૪૦॥

નમઃ શિવાય દેવાય ઈશ્વરાય કપર્દિને ।
રુદ્રાય વિષ્ણવે તુભ્યં બ્રહ્મણે સૂર્યમૂર્તયે ॥ ૪૧॥

સૂત ઉવાચ ।
યઃ શિવં મણ્ડલં દેવં સમ્પૂજ્યૈવં સમાહિતઃ ।
પ્રાતર્મધ્યાહ્નસાયાહ્ને પઠેત્સ્તવમનુત્તમમ્ ॥ ૪૨॥

ઇત્થં શિવેન સાયુજ્યં લભતે નાત્ર સંશયઃ ॥ ૪૩॥

ઇતિ શ્રીલિઙ્ગમહાપુરાણે ઉત્તરભાગે એકોનવિંશાધ્યાયાન્તર્ગતં
ઋષિભિઃ કૃતં શિવસ્તોત્રં સમાપ્તમ્ ।

લિઙ્ગપુરાણ । ઉત્તરભાગ । અધ્યાય ૧૯/૨૭-૪૩॥

lingapurANa . uttarabhAga . adhyAya 19/27-43..

Proofread by PSA Easwaran

*Rishibhih Kritam 2 Shiva Stotram*

pdf was typeset on October 12, 2024

Please send corrections to *sanskrit@cheerful.com*